ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः

हरिः ओं ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

# पद पाठः (वाक्य सहित)

## प्रथमकाण्डे चतुर्थः प्रश्नः

# Version Notes:

**This is now the current Version 1.1 dated August 31, 2022.**

1. This replaces the earlier version 1.0 dated Oct 31, 2021.
2. Corrections found and reported till August 15, 2022 are updated.
3. In this version we have newly added a summery of various padams at the end part of this book.
4. Required convention, style and presentation improvements or standardisations has been done whereever applicable.
5. Notify your corrections / suggestions etc to our email id vedavms@gmail.com

## Earlier Versions

| | | |
|---|---|---|
| 1st | Version Number | 0.0 dated 31st Mar 2019 |
| 2nd | Version Number | 0.1 dated 31st Mar 2020 |
| 3rd | Version Number | 0.2 dated 30th June 2020 |
| 4th | Version Number | 0.3 dated 31st Aug 2020 |
| 5th | Version Number | 1.0 dated 30th June 2021 |
| 6th | Version Number | 1.0 dated 31st Oct 2021 |

Table of Contents

1 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठे प्रथमंकाण्डं 5

1.4 प्रथमकाण्डे चतुर्थः प्रश्नः – सुत्यादिने कर्तव्या ग्रहाः .5

ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः ॥ हरिः ओं

# 1 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठे

# प्रथमं काण्डं

## 1.4 प्रथमकाण्डेचतुर्थः प्रश्नः – सुत्यादिने कर्तव्या ग्रहाः

**TS 1.4.1.1**

आ ददे ग्रावास्यद्ध्वरकृद् देवेभ्यो–गंभीरमिम–मद्ध्वरं
कृद्ध्युत्तमेन पविनेन्द्राय सोमꣳ सुषुतं मधुमन्तं पयस्वन्तं
ँवृष्टिवनिमिन्द्राय त्वा वृत्रघ्न इन्द्राय त्वा वृत्रतुर इन्द्राय त्वा
ऽभिमातिघ्न इन्द्राय त्वा ऽऽदित्यवत इन्द्राय त्वा विश्वदेव्यावते श्वात्राः
स्थ वृत्रतुरो राधोगूर्ता अमृतस्य पत्नीस्ता देवीर्देवत्रेमं ँयज्ञं
धत्तोपहूताः सोमस्य पिबतोपहूतो युष्माकꣳ – [ ] 1

**TS 1.4.1.1 (Padam)**

एति । ददे । ग्रावा । असि । अध्वरकृदित्यद्ध्वर – कृत् । देवेभ्यः ।
गंभीरम् । इमम् । अद्ध्वरम् । कृधि । उत्तमेनेत्युत् – तमेन ।

पविना । इन्द्राय । सोमम् । सुषुतमिति सु – सुतम् । मधुमन्तमिति मधु – मन्तम् । पयस्वन्तम् । वृष्टिवनिमिति वृष्टि – वनिम् । इन्द्राय । त्वा । वृत्रघ्न इति वृत्र – घ्ने । इन्द्राय । त्वा । वृत्रतुर इति वृत्र – तुरे । इन्द्राय । त्वा । अभिमातिघ्न इत्यभिमाति – घ्ने । इन्द्राय । त्वा । आदित्यवत इत्यादित्य – वते । इन्द्राय । त्वा । विश्वदेव्यावत इति विश्वदेव्य – वते । श्वात्राः । स्थ । वृत्रतुर इति वृत्र – तुरः । राधोगूर्ता इति राधः – गूर्ताः । अमृतस्य । पत्नीः । ताः । देवीः । देवत्रेति देव – त्रा । इमम् । यज्ञम् । धत्त । उपहूता इत्युप – हूताः । सोमस्य । पिबत । उपहूत इत्युप–हूतः । युष्माकम् । **1 (50)**

**<u>TS 1.4.1.2</u>**

सोमः पिबतु यत्ते सोम दिवि ज्योतिर्यत् पृथिव्यां ँयदुरावन्तरिक्षे तेनास्मै यजमानायोरु राया कृद्ध्यधि दात्रे वोचो धिषणे वीडू सती वीडयेथा–मूर्जं दधाथामूर्जं मे धत्तं मा वा॑ हि॑सिषं मा मा

हि॒ꣳसि॒ष्टं प्रागपा॒गुद॒गध॒राक् तास्त्वा॒ दिश॒ आ धा॒वन्त्वं॒ब॒ नि ष्वर ।
य॒त्ते ( ) सो॒मादा॒भ्यं॒ नाम॒ जागृ॒वि तस्मै॑ ते सो॒म सोमा॒य स्वाहा॑ ॥ **2**

**TS 1.4.1.2 (Padam)**

सोमः । पि॒ब॒तु॒ । यत् । ते॒ । सो॒म॒ । दि॒वि । ज्योतिः । यत् ।
पृ॒थि॒व्याम् । यत् । उ॒रौ । अ॒न्तरि॑क्षे । तेन॑ । अ॒स्मै । यज॑मानाय ।
उ॒रु । रा॒या । कृ॒धि॒ । अधीति॑ । दा॒त्रे । वो॒च॒ः । धिष॑णे॒ इति॑ ।
वी॒डू इति॑ । स॒ती इति॑ । वी॒ड॒य॒ेथा॒म् । ऊर्ज॑म् । द॒धा॒था॒म् । ऊर्ज॑म् ।
मे॒ । ध॒त्त॒म् । मा । वा॒म् । हि॒ꣳसि॒ष॒म् । मा । मा॒ । हि॒ꣳसि॒ष्ट॒म् ।
प्राक् । अपा॑क् । उद॑क् । अ॒ध॒राक् । ताः । त्वा॒ । दिशः॑ । एति॑ ।
धा॒व॒न्तु॒ । अंब॑ । नीति॑ । स्व॒र ॥ यत् । ते॒ ( ) । सो॒म॒ । अदा॑भ्यम् ।
नाम॑ । जागृ॑वि । तस्मै॑ । ते॒ । सो॒म॒ । सोमा॑य । स्वाहा॑ ॥ **2 (59)**

**(यु॒ष्माकꣳ॑ – स्व॒र य॒त्ते – नव॑ च ) *(A1)***

**TS 1.4.2.1**

वा॒चस्प॑तये पवस्व वाजि॒न् वृषा॒ वृष्णो॑ अ॒ꣳ॒शुभ्यां॒ गभ॑स्तिपूतो
दे॒वो दे॒वानां॑ प॒वित्र॑मसि॒ येषां॑ भा॒गो ऽसि॒ तेभ्य॑स्त्वा॒ स्वांकृ॑तो ऽसि॒
मधु॑मतीर्न॒ इष॑स्कृधि॒ विश्वे॑भ्यस्त्वेन्द्रि॒येभ्यो॑ दि॒व्येभ्य॒ः पार्थि॑वेभ्यो॒

मनस्त्वा ऽष्टूर्वन्तरिक्ष–मन्विहि स्वाहा त्वा सुभवः सूर्याय

देवेभ्यस्त्वा मरीचिपेभ्य एष ते योनिः प्राणाय त्वा ॥ 3

**TS 1.4.2.1 (Padam)**

वाचः । पतये । पवस्व । वाजिन्न् । वृषा । वृष्णः ।

अ꣡ꣳशुभ्यामित्यꣳशु – भ्याम् । गभस्तिपूत इति गभस्ति – पूतः ।

देवः । देवानाम् । पवित्रम् । असि । येषाम् । भागः । असि ।

तेभ्यः । त्वा । स्वाङ्कृतः । असि । मधुमतीरिति मधु – मतीः । नः ।

इषः । कृधि । विश्वेभ्यः । त्वा । इन्द्रियेभ्यः । दिव्येभ्यः ।

पार्थिवेभ्यः । मनः । त्वा । अष्टु । उरु । अन्तरिक्षम् । अन्विति ।

इहि । स्वाहा । त्वा । सुभव इति सु – भवः । सूर्याय । देवेभ्यः ।

त्वा । मरीचिपेभ्य इति मरीचि – पेभ्यः । एषः । ते । योनिः ।

प्राणायेति प्र – अनाय । त्वा ॥ 3 (47)

**(वाचः – सप्तचत्वारिꣳशत्) *(A2)***

**TS 1.4.3.1**

उपयामगृहीतो ऽस्यन्तर्यच्छ मघवन् पाहि सोमममुरुष्य रायः समिषो

यजस्वान्तस्ते दधामि द्यावापृथिवी अन्तरुर्वन्तरिक्षꣳ सजोषा

देवैरवरैः परैश्चान्तर्यामे मघवन् मादयस्व स्वांकृतो ऽसि मधुमतीर्न

इषस्कृधि विश्वेभ्यस्त्वेन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यो मनस्त्वा

ऽष्टूर्वन्तरिक्षमन्विहि स्वाहा त्वा सुभवः सूर्याय देवेभ्य ( )

स्त्वा मरीचिपेभ्य एष ते योनिरपानाय त्वा ॥ 4

**TS 1.4.3.1 (Padam)**

उपयामगृहीत इत्युपयाम – गृहीतः । असि । अन्तः । यच्छ ।

मघवन्निति मघ – वन्न् । पाहि । सोमम् । उरुष्य । रायः । समिति ।

इषः । यजस्व । अन्तः । ते । दधामि । द्यावापृथिवी इति

द्यावा – पृथिवी । अन्तः । उरु । अन्तरिक्षम् । सजोषा इति

स – जोषाः । देवैः । अवरैः । परैः । च । अन्तर्याम इत्यन्तः–यामे ।

मघवन्निति मघ – वन्न् । मादयस्व । स्वाङ्कृतः । असि । मधुमतीरिति

मधु – मतीः । नः । इषः । कृधि । विश्वेभ्यः । त्वा । इन्द्रियेभ्यः ।

दिव्येभ्यः । पार्थिवेभ्यः । मनः । त्वा । अष्टु । उरु । अन्तरिक्षम् ।

अन्विति । इहि । स्वाहा । त्वा । सुभव इति सु – भवः । सूर्याय ।

देवेभ्यः( ) । त्वा । मरीचिपेभ्य इति मरीचि – पेभ्यः । एषः । ते ।

योनिः । अपानायेत्यप – अनाय । त्वा ॥ **4 (57)**

**(देवेभ्यः – सप्त च)** *(A3)*

**TS 1.4.4.1**

आ वायो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार ।

उपो ते अन्धो मद्य–मयामि यस्य देव दधिषे पूर्वपेयं ॥

उपयामगृहीतो ऽसि वायवे त्वेन्द्रवायू इमे सुताः ।

उप प्रयोभिरा गतमिन्दवो वामुशन्ति हि ॥

उपयामगृहीतो ऽसीन्द्रवायुभ्यां त्वैष ते योनिः सजोषाभ्यां त्वा ॥ **5**

**TS 1.4.4.1 (Padam)**

एति । वायो इति । भूष । शुचिपा इति शुचि – पाः । उपेति । नः ।

सहस्रम् । ते । नियुत इति नि – युतः । विश्ववारेति विश्व – वार ॥

उपो इति । ते । अन्धः । मद्यम् । अयामि । यस्य । देव । दधिषे ।

पूर्वपेयमिति पूर्व – पेयम् ॥ उपयामगृहीत इत्युपयाम – गृहीतः ।

असि । वायवे । त्वा । इन्द्रवायू इतीन्द्र – वायू । इमे । सुताः ॥

उपेति । प्रयोभिरिति प्रयः – भिः । एति । गतम् । इन्दवः । वाम् ।

उशन्ति । हि ॥ उपयामगृहीत इत्युपयाम – गृहीतः । असि ।

इन्द्रवायुभ्यामितीन्द्रवायु – भ्याम् । त्वा । एषः । ते । योनिः ।

सजोषाभ्यामिति स – जोषाभ्याम् । त्वा ॥ **5 (43)**

**(आ वायो – त्रिचत्वारिꣳशत्)** *(A4)*

**TS 1.4.5.1**

अयं ँवां मित्रावरुणा सुतः सोम ऋतावृधा । ममेदिह श्रुतꣳ हवं । उपयामगृहीतो ऽसि मित्रावरुणाभ्यां त्वैष ते योनिर्. ऋतायुभ्यां त्वा ॥ **6**

**TS 1.4.5.1 (Padam)**

अयम् । वाम् । मित्रावरुणेति मित्रा – वरुणा । सुतः । सोमः ।

ऋतावृधेत्यृत – वृधा ॥ मम । इत् । इह । श्रुतम् । हवम् ॥

उपयामगृहीत इत्युपयाम – गृहीतः । असि । मित्रावरुणाभ्यामिति

मित्रा – वरुणाभ्याम् । त्वा । एषः । ते । योनिः ।

ऋतायुभ्यामित्यृतायु – भ्याम् । त्वा ॥ **6 (20)**

**(अयं ँवां – ँविꣳशतिः)** *(A5)*

**TS 1.4.6.1**

या वां कशा मधुमत्यश्विना सूनृतावती । तया यज्ञं मिमिक्षतं ।
उपयामगृहीतो ऽस्यश्विभ्यां त्वैष ते योनिर्माद्ध्वीभ्यां त्वा ॥ **7**

**TS 1.4.6.1 (Padam)**

या । वाम् । कशा । मधुमतीति मधु – मती । अश्विना ।
सूनृतावतीति सूनृता – वती ॥ तया । यज्ञम् । मिमिक्षतम् ॥
उपयामगृहीत इत्युपयाम – गृहीतः । असि ।
अश्विभ्यामित्यश्वि – भ्याम् । त्वा । एषः । ते । योनिः ।
माद्ध्वीभ्याम् । त्वा ॥ **7 (18) (या वा – मष्टादश)** *(A6)*

**TS 1.4.7.1**

प्रातर्युजौ वि मुच्येथा–मश्विनावेह गच्छतं । अस्य सोमस्य पीतये ॥
उपयामगृहीतो ऽस्यश्विभ्यां त्वैष ते योनिरश्विभ्यां त्वा ॥ **8**

**TS 1.4.7.1 (Padam)**

प्रातर्युजाविति प्रातः – युजौ । वीति । मुच्येथाम् । अश्विनौ । एति ।
इह । गच्छतम् ॥ अस्य । सोमस्य । पीतये ॥ उपयामगृहीत
इत्युपयाम – गृहीतः । असि । अश्विभ्यामित्यश्वि – भ्याम् ।

त्वा । एषः । ते । योनिः । अश्विभ्यामित्यश्वि – भ्याम् । त्वा ॥ **8 (19)**

**(प्रातर्युजावे – कान्नविꣳशतिः)** *(A7)*

**TS 1.4.8.1**

अयं ँवेनश्चोदयत् पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने ।

इममपाꣳ संगमे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्ति ॥

उपयामगृहीतो ऽसि शण्डाय त्वैष ते योनिर्वीरतां पाहि ॥ **9**

**TS 1.4.8.1 (Padam)**

अयम् । वेनः । चोदयत् । पृश्निगर्भा इति पृश्नि – गर्भाः ।

ज्योतिर्जरायुरिति ज्योतिः – जरायुः । रजसः । विमान इति

वि – माने ॥ इमम् । अपाम् । संगम इति सं – गमे । सूर्यस्य ।

शिशुम् । न । विप्राः । मतिभिरिति मति – भिः । रिहन्ति ॥

उपयामगृहीत इत्युपयाम – गृहीतः । असि । शण्डाय । त्वा । एषः ।

ते । योनिः । वीरताम् । पाहि ॥ **9 (25)**

**(अयं ँवेनः – पञ्चविꣳशतिः)** *(A8)*

**TS 1.4.9.1**

तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्.हिषदꣳ सुवर्विदं

प्रतीचीनं ँवृजनं दोहसे गिरा ऽऽशुं जयन्तमनु यासु वर्द्धसे ।

उपयामगृहीतो ऽसि मर्काय त्वैष ते योनिः प्रजाः पाहि ॥ **10**

**TS 1.4.9.1 (Padam)**

तम् । प्रत्नथा । पूर्वथा । विश्वथा । इमथा ।

ज्येष्ठतातिमिति ज्येष्ठ – तातिम् । बर्.हिषदमिति बर्.हि – सदम् ।

सुवर्विदमिति सुवः – विदम् । प्रतीचीनम् । वृजनम् । दोहसे । गिरा ।

आशुम् । जयन्तम् । अन्विति । यासु । वर्द्धसे ॥ उपयामगृहीत

इत्युपयाम – गृहीतः । असि । मर्काय । त्वा । एषः । ते । योनिः ।

प्रजा इति प्र – जाः । पाहि ॥ **10 (26)**

**(तं प्रत्नथा – षट्विꣳशतिः )** *(A9)*

**TS 1.4.10.1**

ये देवा दिव्येकादश स्थ पृथिव्यामद्ध्येकादश स्थाप्सुषदो

महिनैकादश स्थ ते देवा यज्ञमिमं जुषद्ध्व–मुपयामगृहीतो–

ऽस्याग्रयणो ऽसि स्वाग्रयणो जिन्व यज्ञं जिन्व यज्ञपतिमभि सवना

पाहि विष्णुस्त्वां पातु विशं त्वं पाहीन्द्रियेणैष ते योनि
र्विश्वेभ्यस्त्वा देवेभ्यः ॥ 11

**TS 1.4.10.1 (Padam)**

ये । देवाः । दिवि । एकादश । स्थ । पृथिव्याम् । अधीति ।
एकादश । स्थ । अफ्सुषद इत्यफ्सु – सदः । महिना । एकादश ।
स्थ । ते । देवाः । यज्ञम् । इमम् । जुषद्ध्वम् । उपयामगृहीत
इत्युपयाम – गृहीतः । असि । आग्रयणः । असि । स्वाग्रयण
इति सु – आग्रयणः । जिन्व । यज्ञम् । जिन्व । यज्ञपतिमिति
यज्ञ – पतिम् । अभीति । सवना । पाहि । विष्णुः । त्वाम् । पातु ।
विशम् । त्वम् । पाहि । इन्द्रियेण । एषः । ते । योनिः । विश्वेभ्यः ।
त्वा । देवेभ्यः ॥ 11 (43) (ये देवा – स्त्रिचत्वारिꣳशत्) *(A10)*

**TS 1.4.11.1**

त्रिꣳशत् त्रयश्च गणिनो रुजन्तो दिवꣳ रुद्राः पृथिवीं च सचन्ते ।
एकादशासो अफ्सुषदः सुतꣳ सोमं जुषन्ताꣳ सवनाय विश्वे ॥
उपयामगृहीतो ऽस्याग्रयणो ऽसि स्वाग्रयणो जिन्व यज्ञं जिन्व

यज्ञपतिमभि सवना पाहि विष्णुस्त्वां पातु विशं त्वं पाहीन्द्रियेणैष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥ 12

**TS 1.4.11.1 (Padam)**

त्रिꣳशत् । त्रयः । च । गणिनः । रुजन्तः । दिवम् । रुद्राः । पृथिवीम् । च । सचन्ते ॥ एकादशासः । अफ्सुषद इत्यफ्सु–सदः । सुतम् । सोमम् । जुषन्ताम् । सवनाय । विश्वे ॥ उपयामगृहीत इत्युपयाम – गृहीतः । असि । आग्रयणः । असि । स्वाग्रयण इति सु – आग्रयणः । जिन्व । यज्ञम् । जिन्व । यज्ञपतिमिति यज्ञ – पतिम् । अभीति । सवना । पाहि । विष्णुः । त्वाम् । पातु । विशम् । त्वम् । पाहि । इन्द्रियेण । एषः । ते । योनिः । विश्वेभ्यः । त्वा । देवेभ्यः ॥ 12 (42) **(त्रिꣳशत्रयो – द्विचत्वारिꣳशत्)** *(A11)*

**TS 1.4.12.1**

उपयामगृहीतोऽसीन्द्राय त्वा बृहद्वते वयस्वत उक्थायुवे यत्त इन्द्र बृहद्–वयस्तस्मै त्वा विष्णवे त्वैष ते योनिरिन्द्राय त्वोक्थायुवे ॥ 13

**TS 1.4.12.1 (Padam)**

उपयामगृहीत इत्युपयाम – गृहीतः । असि । इन्द्राय । त्वा ।

बृहद्वत इति बृहत् – वते । वयस्वते । उक्थायुव इत्युक्थ – युवे ।

यत् । ते । इन्द्र । बृहत् । वयः । तस्मै । त्वा । विष्णवे । त्वा ।

एषः । ते । योनिः । इन्द्राय । त्वा । उक्थायुव इत्युक्थ – युवे ॥ **13**

**(22) (उपयामगृहीतोऽसीन्द्राय – द्वावि॑ँशतिः)** *(A12)*

**TS 1.4.13.1**

मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृताय जातमग्निं ।

कवि॑ँ सम्राज–मतिथिं जनानामासन्ना पात्रं जनयन्त देवाः ॥

उपयामगृहीतो ऽस्यग्नये त्वा वैश्वानराय ध्रुवो ऽसि ध्रुवक्षिति

र्ध्रुवाणां ध्रुवतमो ऽच्युताना–मच्युतक्षित्तम एष ते योनिरग्नये त्वा

वैश्वानराय ॥ **14**

**TS 1.4.13.1 (Padam)**

मूर्द्धानम् । दिवः । अरतिम् । पृथिव्याः । वैश्वानरम् । ऋताय ।

जातम् । अग्निम् ॥ कविम् । सम्राजमिति सं – राजम् । अतिथिम् ।

जनानाम् । आसन्न् । एति । पात्रम् । जनयन्त । देवाः ॥

उपयामगृहीत इत्युपयाम – गृहीतः । असि । अग्नये । त्वा ।
वैश्वानराय । ध्रुवः । असि । ध्रुवक्षितिरिति ध्रुव–क्षितिः । ध्रुवाणाम् ।
ध्रुवतम इति ध्रुव – तमः । अच्युतानाम् । अच्युतक्षित्तम
इत्यच्युतक्षित् – तमः । एषः । ते । योनिः । अग्नये । त्वा ।
वैश्वानराय ॥ **14 (35) (मूर्द्धानं – पञ्चत्रिꣳशत्)** *(A13)*

**TS 1.4.14.1**

मधुश्च माधवश्च शुक्रश्च शुचिश्च नभश्च नभस्यश्चेषश्चोर्जश्च
सहश्च सहस्यश्च तपश्च तपस्यश्चो–पयामगृहीतो ऽसि
सꣳसर्पो ऽस्यꣳहस्पत्याय त्वा ॥ **15**

**TS 1.4.14.1 (Padam)**

मधुः । च । माधवः । च । शुक्रः । च । शुचिः । च । नभः । च ।
नभस्यः । च । इषः । च । ऊर्जः । च । सहः । च । सहस्यः ।
च । तपः । च । तपस्यः । च । उपयामगृहीत इत्युपयाम–गृहीतः ।
असि । सꣳसर्प इति सं – सर्पः । असि ।
अꣳहस्पत्यायेत्यꣳहः – पत्याय । त्वा ॥ **15 (30)**

**(मधुश्च – त्रिꣳशत्)** *(A14)*

**TS 1.4.15.1**

इन्द्राग्नी आ गत॒ सुतं गीर्भिर्नभो वरेण्यं । अस्य पातं धियेषिता ॥

उपयामगृहीतो ऽसीन्द्राग्निभ्यां त्वैष ते योनिरिन्द्राग्निभ्यां त्वा ॥ **16**

**TS 1.4.15.1 (Padam)**

इन्द्राग्नी इतीन्द्र – अग्नी । एति । गतम् । सुतम् । गीर्भिः । नभः ।

वरेण्यम् ॥ अस्य । पातम् । धिया । इषिता ॥ उपयामगृहीत

इत्युपयाम – गृहीतः । असि । इन्द्राग्निभ्यामितीन्द्राग्नि – भ्याम् ।

त्वा । एषः । ते । योनिः । इन्द्राग्निभ्यामितीन्द्राग्नि – भ्याम् ।

त्वा ॥ **16 (20)** **(इन्द्राग्नी विꣳशतिः)** *(A15)*

**TS 1.4.16.1**

ओमासश्चर्.षणीधृतो विश्वे देवास आगत ।

दाश्वाꣳसो दाशुषः सुतं ॥

उपयामगृहीतो ऽसि विश्वेभ्यस्त्वा देवेभ्य एष ते

योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥ **17**

**TS 1.4.16.1 (Padam)**

ओमासः । चर्.षणीधृत इति चर्.षणि – धृतः । विश्वे । देवासः ।

एति । गत ॥ दाश्वाꣳसः । दाशुषः । सुतम् ॥ उपयामगृहीत

इत्युपयाम – गृहीतः । असि । विश्वेभ्यः । त्वा । देवेभ्यः । एषः । ते ।
योनिः । विश्वेभ्यः । त्वा । देवेभ्यः ॥ **17 (20)**

**(ओमासो विꣳशतिः)** *(A16)*

**TS 1.4.17.1**

मरुत्वन्तं ँवृषभं ँवावृधानमकवारिं दिव्यꣳ शासमिन्द्रं ।
विश्वासाहमवसे नूतनायोग्रꣳ सहोदामिह तꣳ हुवेम ॥
उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय
त्वा मरुत्वते ॥ **18**

**TS 1.4.17.1 (Padam)**

मरुत्वन्तम् । वृषभम् । वावृधानम् । अकवारिमित्यकवा – अरिम् ।
दिव्यम् । शासम् । इन्द्रम् ॥ विश्वासाहमिति विश्व–साहम् । अवसे ।
नूतनाय । उग्रम् । सहोदामिति सहः – दाम् । इह । तम् । हुवेम ॥
उपयामगृहीत इत्युपयाम – गृहीतः । असि । इन्द्राय । त्वा ।
मरुत्वते । एषः । ते । योनिः । इन्द्राय । त्वा । मरुत्वते ॥ **18 (26)**

**(मरुत्वन्तꣳ – षट्विꣳशतिः)** *(A17)*

**TS 1.4.18.1**

इन्द्र मरुत्व इह पाहि सोमं यथा शार्याते अपिबः सुतस्य ।

तव प्रणीती तव शूर शर्मन्ना–विवासन्ति कवयः सुयज्ञाः ॥

उपयामगृहीतो ऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय

त्वा मरुत्वते ॥ **19**

**TS 1.4.18.1 (Padam)**

इन्द्र । मरुत्वः । इह । पाहि । सोमम् । यथा । शार्याते । अपिबः ।

सुतस्य ॥ तव । प्रणीतीति प्र – नीती । तव । शूर । शर्मन्न् । एति ।

विवासन्ति । कवयः । सुयज्ञा इति सु – यज्ञाः ॥ उपयामगृहीत

इत्युपयाम – गृहीतः । असि । इन्द्राय । त्वा । मरुत्वते । एषः । ते ।

योनिः । इन्द्राय । त्वा । मरुत्वते ॥ **19 (29)**

**(इन्द्रैकान्न त्रिꣳशत्)** *(A18)*

**TS 1.4.19.1**

मरुत्वाꣳ इन्द्र वृषभो रणाय पिबा सोममनुष्वधं मदाय ।

आ सिञ्चस्व जठरे मद्ध्व ऊर्मिं त्वꣳ राजा ऽसि प्रदिवः सुतानां ॥

उपयामगृहीतो ऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय
त्वा मरुत्वते ॥ 20

**TS 1.4.19.1 (Padam)**

मरुत्वान् । इन्द्र । वृषभः । रणाय । पिब । सोमम् ।
अनुष्वधमित्यनु – स्वधम् । मदाय ॥ एति । सिञ्चस्व । जठरे ।
मद्ध्वः । ऊर्मिम् । त्वम् । राजा । असि । प्रदिव इति प्र – दिवः ।
सुतानाम् ॥ उपयामगृहीत इत्युपयाम – गृहीतः । असि । इन्द्राय ।
त्वा । मरुत्वते । एषः । ते । योनिः । इन्द्राय । त्वा ।
मरुत्वते ॥ 20 (29) (मरुत्वानेकान्नत्रिꣳशत्) *(A19)*

**TS 1.4.20.1**

महाꣳ इन्द्रो य ओजसा पर्जन्यो वृष्टिमाꣳ इव ।
स्तोमैर्वथ्सस्य वावृधे ॥
उपयामगृहीतो ऽसि महेन्द्राय त्वैष ते योनिर्महेन्द्राय त्वा ॥ 21

**TS 1.4.20.1 (Padam)**

महान् । इन्द्रः । यः । ओजसा । पर्जन्यः । वृष्टिमानिति वृष्टि–मान् ।
इव ॥ स्तोमैः । वथ्सस्य । वावृधे ॥

उपयामगृहीत इत्युपयाम – गृहीतः । असि ।

महेन्द्रायेति महा – इन्द्राय । त्वा । एषः । ते । योनिः ।

महेन्द्रायेति महा – इन्द्राय । त्वा ॥ **21(19)**

**(महानेकान्नविꣳशतिः)** *(A20)*

**TS 1.4.21.1**

महाꣳ इन्द्रो नृवदा चर्.षणिप्रा उत द्विबर्.हा अमिनः सहोभिः ।

अस्मद्रियग्वावृधे वीर्यायोरुः पृथुः सुकृतः कर्तृभिर्भूत् ॥

उपयामगृहीतो ऽसि महेन्द्राय त्वैष ते योनिर्महेन्द्राय त्वा ॥ **22**

**TS 1.4.21.1 (Padam)**

महान् । इन्द्रः । नृवदिति नृ – वत् । एति । चर्.षणिप्रा इति

चर्.षणि – प्राः । उत । द्विबर्.हा इति द्वि – बर्.हाः । अमिनः ।

सहोभिरिति सहः – भिः ॥ अस्मद्रियगित्यस्म – द्रियक् । वावृधे ।

वीर्याय । उरुः । पृथुः । सुकृत इति सु – कृतः । कर्तृभिरिति

कर्तृ – भिः । भूत् ॥ उपयामगृहीत इत्युपयाम – गृहीतः । असि ।

महेन्द्रायेति महा – इन्द्राय । त्वा । एषः । ते । योनिः ।

महेन्द्रायेति महा – इन्द्राय । त्वा ॥ 22 (26)

(महान् नृवथ् – षड्विꣳशतिः) *(A21)*

**TS 1.4.22.1**

कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे ।

उपोपेन्नु मघवन् भूय इन्नु ते दानं देवस्य पृच्यते ॥

उपयामगृहीतो ऽस्या–दित्येभ्यस्त्वा ॥

कदा चन प्र युच्छस्युभे नि पासि जन्मनी ।

तुरीयादित्य सवनं त इन्द्रियमा तस्थावमृतं दिवि ॥

यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः ॥

आ वो ( ) ऽर्वाची सुमति–र्ववृत्यादꣳहोश्चिद्–या वरिवोवित्तरा ऽसत् ॥

विवस्व आदित्यैष ते सोमपीथस्तेन मन्दस्व तेन तृप्य तृप्यास्म

ते वयं तर्पयितारो या दिव्या वृष्टिस्तया त्वा श्रीणामि ॥ 23

**TS 1.4.22.1 (Padam)**

कदा । चन । स्तरीः । असि । न । इन्द्र । सश्चसि । दाशुषे ॥

उपोपेत्युप – उप । इत् । नु । मघवन्निति मघ – वन्न् । भूयः ।

इत् । नु । ते । दानम् । देवस्य । पृच्यते ॥

उपयामगृहीत इत्युपयाम – गृहीतः । असि । आदित्येभ्यः । त्वा ॥ कदा । चन । प्रेति । युच्छसि । उभे इति । नीति । पासि । जन्मनी इति ॥ तुरीय । आदित्य । सवनम् । ते । इन्द्रियम् । एति । तस्थौ । अमृतम् । दिवि ॥ यज्ञः । देवानाम् । प्रतीति । एति । सुम्नम् । आदित्यासः । भवत । मृडयन्तः ॥ एति । वः ( ) । अर्वाची । सुमतिरिति सु – मतिः । ववृत्यात् । अꣳहोः । चित् । या । वरिवोवित्तरेति वरिवोवित् – तरा । असत् ॥ विवस्वः । आदित्य । एषः । ते । सोमपीथ इति सोम – पीथः । तेन । मन्दस्व । तेन । तृप्य । तृप्यास्म । ते । वयम् । तर्पयितारः । या । दिव्या । वृष्टिः । तया । त्वा । श्रीणामि ॥ **23 (77)**

**(वः – सप्तविꣳशतिश्च)** *(A22)*

**<u>TS 1.4.23.1</u>**

वाममद्य सवितर्वाममु श्वो दिवेदिवे वाममस्मभ्यꣳ सावीः ।
वामस्य हि क्षयस्य देव भूरेरया धिया वामभाजः स्याम ॥
उपयामगृहीतो ऽसि देवाय त्वा सवित्रे ॥ **24**

**TS 1.4.23.1 (Padam)**

वामम् । अद्य । सवितः । वामम् । उ । श्वः । दिवेदिव इति

दिवे – दिवे । वामम् । अस्मभ्यमित्यस्म – भ्यम् । सावीः ॥

वामस्य । हि । क्षयस्य । देव । भूरेः । अया । धिया । वामभाज

इति वाम – भाजः । स्याम ॥ उपयामगृहीत इत्युपयाम – गृहीतः ।

असि । देवाय । त्वा । सवित्रे ॥ **24 (24)**

**(वामं – चतुर्विꣳशतिः)** *(A23)*

**TS 1.4.24.1**

अदब्धेभिः सवितः पायुभिष्ट्वꣳ शिवेभिरद्य परि पाहि नो गयं ।

हिरण्यजिह्वः सुविताय नव्यसे रक्षा माकिर्नो अघशꣳस ईशत ॥

उपयामगृहीतोऽसि देवाय त्वा सवित्रे ॥ **25**

**TS 1.4.24.1 (Padam)**

अदब्धेभिः । सवितः । पायुभिरिति पायु – भिः । त्वम् । शिवेभिः ।

अद्य । परीति । पाहि । नः । गयम् ॥

हिरण्यजिह्व इति हिरण्य – जिह्वः । सुविताय । नव्यसे । रक्ष ।

माकिः । नः । अघशꣳस इत्यघ – शꣳसः । ईशत ॥

उपयामगृहीत इत्युपयाम – गृहीतः । असि । देवाय । त्वा ।
सवित्रे ॥ 25 (23) (**अदब्धेभि – स्त्रियोविꣳशतिः**) *(A24)*

**TS 1.4.25.1**

हिरण्यपाणिमूतये सवितारमुप ह्वये । स चेत्ता देवता पदं ॥
उपयामगृहीतो ऽसि देवाय त्वा सवित्रे ॥ 26

**TS 1.4.25.1 (Padam)**

हिरण्यपाणिमिति हिरण्य – पाणिम् । ऊतये । सवितारम् । उपेति ।
ह्वये ॥ सः । चेत्ता । देवता । पदम् ॥
उपयामगृहीत इत्युपयाम – गृहीतः । असि । देवाय । त्वा ।
सवित्रे ॥ 26 (14) (**हिरण्यपाणिं – चतुर्दश**) *(A25)*

**TS 1.4.26.1**

सुशर्मा ऽसि सुप्रतिष्ठानो बृहदुक्षे नम एष ते योनि
र्विश्वेभ्यस्त्वा देवेभ्यः ॥ 27

**TS 1.4.26.1 (Padam)**

सुशर्मेति सु – शर्मा । असि । सुप्रतिष्ठान इति सु – प्रतिष्ठानः ।
बृहत् । उक्षे । नमः । एषः । ते । योनिः । विश्वेभ्यः । त्वा ।
देवेभ्यः ॥ 27 (12) (**सुशर्मा – द्वादश**) *(A26)*

**TS 1.4.27.1**

बृहस्पति–सुतस्य त इन्दो इन्द्रियावतः पत्नीवन्तं ग्रहं

गृह्णाम्यग्ना(3)इ पत्नीवा(3) स्सजूर्देवेन त्वष्ट्रा सोमं पिब स्वाहा ॥ 28

**TS 1.4.27.1 (Padam)**

बृहस्पतिसुतस्येति बृहस्पति – सुतस्य । ते । इन्दो इति ।

इन्द्रियावत इतीन्द्रिय – वतः । पत्नीवन्तमिति पत्नी – वन्तम् ।

ग्रहम् । गृह्णामि । अग्ना(3) इ । पत्नीवा(3) इति पत्नी – वा(3)ः ।

सजूरिति स – जूः । देवेन । त्वष्ट्रा । सोमम् । पिब ।

स्वाहा ॥ 28 (15) **(बृहस्पतिसुतस्य – पञ्चदश)** *(A27)*

**TS 1.4.28.1**

हरिरसि हारियोजनो हर्योः स्थाता वज्रस्य भर्ता पृश्नेः प्रेता तस्य ते

देव सोमेष्टयजुषः स्तुतस्तोमस्य शस्तोक्थस्य हरिवन्तं ग्रहं गृह्णामि

हरीः स्थ हर्योर्धानाः सहसोमा इन्द्राय स्वाहा ॥ 29

**TS 1.4.28.1 (Padam)**

हरिः । असि । हारियोजन इति हारि – योजनः । हर्योः । स्थाता ।

वज्रस्य । भर्ता । पृश्नेः । प्रेता । तस्य । ते । देव । सोम ।

इष्टयजुष इतीष्ट – यजुषः । स्तुतस्तोमस्येति स्तुत – स्तोमस्य ।

शस्तोक्थस्येति शस्त – उक्थस्य । हरिवन्तमिति हरि – वन्तम् ।
ग्रहम् । गृह्णामि । हरीः । स्थ । हर्योः । धानाः ।
सहसोमा इति सह – सोमाः । इन्द्राय । स्वाहा ॥ **29 (26)**

**(हरिरसि – षड्विꣳशतिः)** *(A28)*

**TS 1.4.29.1**

अग्न आयूꣳषि पवस आ सुवोर्जमिषं च नः ।
आरे बाधस्व दुच्छुनां ॥
उपयामगृहीतोऽस्यग्नये त्वा तेजस्वत एष ते योनिरग्नये त्वा
तेजस्वते ॥ **30**

**TS 1.4.29.1 (Padam)**

अग्ने । आयूꣳषि । पवसे । एति । सुव । ऊर्जम् । इषम् । च । नः ॥
आरे । बाधस्व । दुच्छुनाम् ॥ उपयामगृहीत इत्युपयाम – गृहीतः ।
असि । अग्नये । त्वा । तेजस्वते । एषः । ते । योनिः । अग्नये ।
त्वा । तेजस्वते ॥ **30 (23)**

**(अग्न आयूꣳषि – त्रयोविꣳशतिः)** *(A29)*

**TS 1.4.30.1**

उत्तिष्ठन्नोजसा सह पीत्वा शिप्रे अवेपयः । सोममिन्द्र चमू सुतं ॥

उपयामगृहीतो ऽसीन्द्राय त्वौजस्वत एष ते योनिरिन्द्राय

त्वौजस्वते ॥ **31**

**TS 1.4.30.1 (Padam)**

उत्तिष्ठन्नित्युत् – तिष्ठन्न् । ओजसा । सह । पीत्वा । शिप्रे इति ।

अवेपयः ॥ सोमम् । इन्द्र । चमू इति । सुतम् ॥ उपयामगृहीत

इत्युपयाम – गृहीतः । असि । इन्द्राय । त्वा । ओजस्वते । एषः ।

ते । योनिः । इन्द्राय । त्वा । ओजस्वते ॥ **31(21)**

**(उत्तिष्ठन्नेकविꣳशतिः)** *(A30)*

**TS 1.4.31.1**

तरणि र्विश्वदर्.शतो ज्योतिष्कृदसि सूर्य । विश्वमा भासि रोचनं ॥

उपयामगृहीतो ऽसि सूर्याय त्वा भ्राजस्वत एष ते योनिः सूर्याय त्वा

भ्राजस्वते ॥ **32**

**TS 1.4.31.1 (Padam)**

तरणिः । विश्वदर्.शत इति विश्व – दर्.शतः । ज्योतिष्कृदिति

ज्योतिः – कृत् । असि । सूर्य ॥ विश्वम् । एति । भासि । रोचनम् ॥

उपयामगृहीत इत्युपयाम – गृहीतः । असि । सूर्याय । त्वा ।

भ्राजस्वते । एषः । ते । योनिः । सूर्याय । त्वा ।

भ्राजस्वते ॥ 32 (20) (तरणि – विꣳशतिः) *(A31)*

**TS 1.4.32.1**

आ प्यायस्व मदिन्तम सोम विश्वाभि–रूतिभिः ।

भवा नः सप्रथस्तमः ॥ 33

**TS 1.4.32.1 (Padam)**

एति । प्यायस्व । मदिन्तम । सोम । विश्वाभिः ।

ऊतिभिरित्यूति – भिः ॥ भव । नः । सप्रथस्तम इति

सप्रथः – तमः ॥ 33 (9) (आ प्यायस्व – नव) *(A32)*

**TS 1.4.33.1**

ईयुष्टे ये पूर्वतरामपश्यन् व्युच्छन्तीमुषसं मर्त्यासः ।

अस्माभिरू नु प्रतिचक्ष्या ऽभूदो ते यन्ति ये अपरीषु पश्यान् ॥ 34

**TS 1.4.33.1 (Padam)**

ईयुः । ते । ये । पूर्वतरामिति पूर्व – तराम् । अपश्यन्न् ।

व्युच्छन्तीमिति वि – उच्छन्तीम् । उषसम् । मर्त्यासः ॥ अस्माभिः ।

उ । नु । प्रतिचक्ष्येति प्रति – चक्ष्या । अभूत् । ओ इति । ते ।

यन्ति । ये । अपरीषु । पश्यान् ॥ **34 (19)**

**(ईयु – रेकान्नविꣳशतिः)** *(A33)*

**TS 1.4.34.1**

ज्योतिष्मतीं त्वा सादयामि ज्योतिष्कृतं त्वा सादयामि

ज्योतिर्विदं त्वा सादयामि भास्वतीं त्वा सादयामि

ज्वलन्तीं त्वा सादयामि मल्मलाभवन्तीं त्वा सादयामि

दीप्यमानां त्वा सादयामि रोचमानां त्वा सादयाम्यजस्रां

त्वा सादयामि बृहज्ज्योतिषं त्वा सादयामि

बोधयन्तीं त्वा सादयामि जाग्रतीं त्वा सादयामि ॥ **35**

**TS 1.4.34.1 (Padam)**

ज्योतिष्मतीम् । त्वा । सादयामि । ज्योतिष्कृतमिति ज्योतिः–कृतम् ।

त्वा । सादयामि । ज्योतिर्विदमिति ज्योतिः – विदम् । त्वा ।

सादयामि । भास्वतीम् । त्वा । सादयामि । ज्वलन्तीम् । त्वा ।

सादयामि । मल्मलाभवन्तीमिति मल्मला – भवन्तीम् । त्वा ।

सादयामि । दीप्यमानाम् । त्वा । सादयामि । रोचमानाम् । त्वा ।

सादयामि । अजस्राम् । त्वा । सादयामि ।

बृहज्ज्योतिषमिति बृहत् – ज्योतिषम् । त्वा । सादयामि ।

बोधयन्तीम् । त्वा । सादयामि । जाग्रतीम् । त्वा ।

सादयामि ॥ **35 (36)** **(ज्योतिष्मतीꣳ – षट्त्रिꣳशत्)** *(A34)*

**<u>TS 1.4.35.1</u>**

प्रयासाय स्वाहा ऽऽयासाय स्वाहा वियासाय स्वाहा सँयासाय स्वाहोद्यासाय स्वाहा ऽवयासाय स्वाहा शुचे स्वाहा शोकाय स्वाहा तप्यत्वै स्वाहा तपते स्वाहा ब्रह्महत्यायै स्वाहा सर्वस्मै स्वाहा ॥ **36**

**<u>TS 1.4.35.1 (Padam)</u>**

प्रयासायेति प्र – यासाय । स्वाहा । आयासायेत्या – यासाय । स्वाहा । वियासायेति वि – यासाय । स्वाहा । सम्यँसायेति सं – यासाय । स्वाहा । उद्यासायेत्युत् – यासाय । स्वाहा । अवयासायेत्यव – यासाय । स्वाहा । शुचे । स्वाहा । शोकाय । स्वाहा । तप्यत्वै । स्वाहा । तपते । स्वाहा । ब्रह्महत्याया इति ब्रह्म – हत्यायै । स्वाहा । सर्वस्मै । स्वाहा ॥ **36 (24)**

**(प्रयासाय – चतुर्विꣳशतिः)** *(A35)*

**TS 1.4.36.1**

चित्तꣳ सन्तानेन भवं ँयक्ना रुद्रं तनिम्ना पशुपतिꣳ

स्थूलहृदयेनाग्निꣳ हृदयेन रुद्रं ँलोहितेन शर्वं मतस्नाभ्यां

महादेव–मन्तःपार्श्वेनौषिष्ठहनꣳ शिङ्गी–निकोश्याभ्यां ॥ **37**

**TS 1.4.36.1 (Padam)**

चित्तम् । सन्तानेनेति सं – तानेन । भवम् । यक्ना । रुद्रम् ।

तनिम्ना । पशुपतिमिति पशु – पतिम् । स्थूलहृदयेनेति

स्थूल – हृदयेन । अग्निम् । हृदयेन । रुद्रम् । लोहितेन । शर्वम् ।

मतस्नाभ्याम् । महादेवमिति महा – देवम् ।

अन्तःपार्श्वेनेत्यन्तः – पार्श्वेन । ओषिष्ठहनमित्योषिष्ठ – हनम् ।

शिङ्गीनिकोश्याभ्यामिति शिङ्गी – निकोश्याभ्याम् ॥ **37 (18)**

**(चित्त – मष्टादश)** *(A36)*

**TS 1.4.37.1**

आ तिष्ठ वृत्रहन् रथं ँयुक्ता ते ब्रह्मणा हरी ।

अर्वाचीनꣳ सु ते मनो ग्रावा कृणोतु वग्नुना ॥

उपयामगृहीतो ऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय

त्वा षोडशिने ॥ 38

**TS 1.4.37.1 (Padam)**

एति । तिष्ठ । वृत्रहन्निति वृत्र – हन्न् । रथम् । युक्ता । ते । ब्रह्मणा ।

हरी इति ॥ अर्वाचीनम् । स्विति । ते । मनः । ग्रावा । कृणोतु ।

वग्नुना ॥ उपयामगृहीत इत्युपयाम – गृहीतः । असि । इन्द्राय ।

त्वा । षोडशिने । एषः । ते । योनिः । इन्द्राय । त्वा ।

षोडशिने ॥ 38 (26) **(आ तिष्ठ – षट्विꣳशतिः)** *(A37)*

**TS 1.4.38.1**

इन्द्रमिद्धरी वहतो ऽप्रतिधृष्टशवस–मृषीणां च स्तुतीरुप

यज्ञं च मानुषाणां ॥

उपयामगृहीतो ऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय

त्वा षोडशिने ॥ 39

**TS 1.4.38.1 (Padam)**

इन्द्रम् । इत् । हरी इति । वहतः ।

अप्रतिधृष्टशवसमित्यप्रतिधृष्ट – शवसम् । ऋषीणाम् । च । स्तुतीः ।

उपेति । यज्ञम् । च । मानुषाणाम् ॥

उपयामगृहीत इत्युपयाम – गृहीतः । असि । इन्द्राय । त्वा ।

षोडशिने । एषः । ते । योनिः । इन्द्राय । त्वा । षोडशिने ॥ **39 (23)**

**(इन्द्रमित् – त्रयोविꣳशतिः)** *(A38)*

**TS 1.4.39.1**

असावि सोम इन्द्र ते शविष्ठ धृष्णवा गहि ।

आ त्वा पृणक्त्विन्द्रियꣳ रजः सूर्यं न रश्मिभिः ॥

उपयामगृहीतो ऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय

त्वा षोडशिने ॥ **40**

**TS 1.4.39.1 (Padam)**

असावि । सोमः । इन्द्र । ते । शविष्ठ । धृष्णो । एति । गहि ॥

एति । त्वा । पृणक्तु । इन्द्रियम् । रजः । सूर्यम् । न । रश्मिभिरिति

रश्मि – भिः ॥ उपयामगृहीत इत्युपयाम – गृहीतः । असि ।

इन्द्राय । त्वा । षोडशिने । एषः । ते । योनिः । इन्द्राय । त्वा ।

षोडशिने ॥ **40 (27)** **(असावि – सप्तविꣳशतिः)** *(A39)*

**TS 1.4.40.1**

सर्वस्य प्रतिशीवरी भूमिस्त्वोपस्थ आ ऽधित ।

स्योना ऽस्मै सुषदा भव यच्छास्मै शर्म सप्रथाः ॥

उपयामगृहीतो ऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय

त्वा षोडशिने ॥ **41**

**TS 1.4.40.1 (Padam)**

सर्वस्य । प्रतिशीवरीति प्रति – शीवरी । भूमिः । त्वा ।

उपस्थ इत्युप – स्थे । एति । अधित ॥ स्योना । अस्मै । सुषदेति

सु – सदा । भव । यच्छ । अस्मै । शर्म । सप्रथा इति स–प्रथाः ॥

उपयामगृहीत इत्युपयाम – गृहीतः । असि । इन्द्राय । त्वा ।

षोडशिने । एषः । ते । योनिः । इन्द्राय । त्वा । षोडशिने ॥ **41 (26)**

**(सर्वस्य षड्विꣳशतिः)** *(A40)*

**TS 1.4.41.1**

महाꣳ इन्द्रो वज्रबाहुः षोडशी शर्म यच्छतु ।

स्वस्ति नो मघवा करोतु हन्तु पाप्मानं ँयो ऽस्मान् द्वेष्टि ॥

उपयामगृहीतो ऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा

षोडशिने ॥ 42

**TS 1.4.41.1 (Padam)**

महान् । इन्द्रः । वज्रबाहुरिति वज्र – बाहुः । षोडशी । शर्म ।

यच्छतु ॥ स्वस्ति । नः । मघवेति मघ – वा । करोतु । हन्तु ।

पाप्मानम् । यः । अस्मान् । द्वेष्टि ॥

उपयामगृहीत इत्युपयाम – गृहीतः । असि । इन्द्राय । त्वा ।

षोडशिने । एषः । ते । योनिः । इन्द्राय । त्वा । षोडशिने ॥ **42 (26)**

**(महान् – षड्विꣳशतिः)** *(A41)*

**TS 1.4.42.1**

सजोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहञ्छूर विद्वान् ।

जहि शत्रूꣳरप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः ॥

उपयामगृहीतो ऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा

षोडशिने ॥ 43

**TS 1.4.42.1 (Padam)**

सजोषा इति स – जोषाः । इन्द्र । सगण इति स – गणः ।
मरुद्भिरिति मरुत् – भिः । सोमम् । पिब । वृत्रहन्निति वृत्र – हन्न् ।
शूर । विद्वान् ॥ जहि । शत्रून् । अपेति । मृधः । नुदस्व । अथ ।
अभयम् । कृणुहि । विश्वतः । नः ॥ उपयामगृहीत
इत्युपयाम – गृहीतः । असि । इन्द्राय । त्वा । षोडशिने । एषः ।
ते । योनिः । इन्द्राय । त्वा । षोडशिने ॥ **43 (30)**

**(सजोषाः – त्रिꣳशत्)** *(A42)*

**TS 1.4.43.1**

उदु त्यं जातवेदसं देवं वँहन्ति केतवः । दृशे विश्वाय सूर्यं ॥
चित्रं देवाना–मुदगादनीकं चक्षु र्मित्रस्य वरुणस्याग्नेः ।
आ ऽप्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्च ॥
अग्ने नय सुपथा राये अस्मान्. विश्वानि देव वयुनानि विद्वान् ।
युयोद्ध्यस्म–ज्जुहुराण मेनो भूयिष्ठां ते नमउक्तिं विधेम ॥
दिवं गच्छ सुवः पत रूपेण – [ ] **44**

**TS 1.4.43.1 (Padam)**

उदिति । उ । त्यम् । जातवेदसमिति जात – वेदसम् । देवम् ।

वहन्ति । केतवः ॥ दृशे । विश्वाय । सूर्यम् ॥ चित्रम् । देवानाम् ।

उदिति । अगात् । अनीकम् । चक्षुः । मित्रस्य । वरुणस्य । अग्नेः ॥

ऐति । अप्राः । द्यावापृथिवी इति द्यावा – पृथिवी । अन्तरिक्षम् ।

सूर्यः । आत्मा । जगतः । तस्थुषः । च ॥ अग्ने । नय ।

सुपथेति सु – पथा । राये । अस्मान् । विश्वानि । देव । वयुनानि ।

विद्वान् ॥ युयोधि । अस्मत् । जुहुराणम् । एनः । भूयिष्ठाम् । ते ।

नमउक्तिमिति नमः – उक्तिम् । विधेम ॥ दिवम् । गच्छ । सुवः ।

पत । रूपेण । **44 (50)**

**TS 1.4.43.2**

वो रूपमभ्यैमि वयसा वयः ।

तुथो वो विश्व वेदा वि भजतु वर्.षिष्ठे अधि नाके ॥

एतत्ते अग्ने राध ऐति सोमच्युतं तन्मित्रस्य पथा नयर्तस्य पथा प्रेत

चन्द्रदक्षिणा यज्ञस्य पथा सुविता नयन्ती ब्राह्मणमद्य

राद्ध्यासमृषिमार्.षेयं पितृमन्तं पैतृमत्य९ं सुधातुदक्षिणं ँवि सुवः

पश्य व्यन्तरिक्षं यतस्व सदस्यै ( ) –रस्मद्दात्रा देवत्रा गच्छत

मधुमतीः प्रदातारमा विशतानवहायास्मान् देवयानेन पथेत सुकृतां

ँल्लोके सीदत तन्नः सᳪस्कृतं ॥ **45**

**TS 1.4.43.2 (Padam)**

वः । रूपम् । अभि । एति । एमि । वयसा । वयः ॥ तुथः । वः ।

विश्ववेदा इति विश्व – वेदाः । वीति । भजतु । वर्.षिष्ठे । अधीति ।

नाके ॥ एतत् । ते । अग्ने । राधः । एति । एति ।

सोमच्युतमिति सोम – च्युतम् । तत् । मित्रस्य । पथा । नय ।

ऋतस्य । पथा । प्रेति । इत । चन्द्रदक्षिणा इति चन्द्र – दक्षिणाः ।

यज्ञस्य । पथा । सुविता । नयन्तीः । ब्राह्मणम् । अद्य । राद्ध्यासम् ।

ऋषिम् । आर्.षेयम् । पितृमन्तमिति पितृ – मन्तम् । पैतृमत्यमिति

पैतृ – मत्यम् । सुधातुदक्षिणमिति सुधातु – दक्षिणम् । वीति ।

सुवः । पश्य । वीति । अन्तरिक्षम् । यतस्व । सदस्यैः ( ) ।

अस्मद्दात्रा इत्यस्मत् – दात्राः । देवत्रेति देव – त्रा । गच्छत ।

मधुमतीरिति मधु – मतीः । प्रदातारमिति प्र – दातारम् । एति ।

विशत । अनवहायेत्यनव – हाय । अस्मान् । देवयानेनेति

देव – यानेन । पथा । इत । सुकृतामिति सु – कृताम् । लोके ।

सीदत । तत् । नः । स७ँस्कृतम् ॥ **45 (68)**

**(रूपेण – सदस्यै – रष्टादश च)** *(A43)*

**TS 1.4.44.1**

धाता रातिः सवितेदं जुषन्तां प्रजापति र्निधिपतिर्नो अग्निः ।

त्वष्टा विष्णुः प्रजया स७ँरराणो यजमानाय द्रविणं दधातु ॥

समिन्द्र णो मनसा नेषि गोभिः स७ँ सूरिभिर्मघवन्थ् स७ स्वस्त्या ।

सं ब्रह्मणा देवकृतं ँयदस्ति सं देवाना७ँ सुमत्या यज्ञियानां ॥

सं ँवर्चसा पयसा सं तनूभि – रगन्महि मनसा स७ँ शिवेन ॥

त्वष्टा नो अत्र वरिवः कृणो – [ ] **46**

**TS 1.4.44.1 (Padam)**

धता । रातिः । सविता । इदम् । जुषन्ताम् । प्रजापतिरिति

प्रजा – पतिः । निधिपतिरिति निधि – पतिः । नः । अग्निः ॥

त्वष्टा । विष्णुः । प्रजयेति प्र – जया । स७ँरराण इति सं–रराणः ।

यजमानाय । द्रविणम् । दधातु ॥ समिति । इन्द्र । नः ।

मनसा । नेषि । गोभिः । समिति । सूरिभिरिति सूरि – भिः ।
मघवन्निति मघ – वन्न् । समिति । स्वस्त्या ॥ समिति । ब्रह्मणा ।
देवकृतमिति देव – कृतम् । यत् । अस्ति । समिति ।
देवानाम् । सुमत्येति सु – मत्या । यज्ञियानाम् ॥ समिति । वर्चसा ।
पयसा । समिति । तनूभिः । अगन्महि । मनसा । समिति । शिवेन ॥
त्वष्टा । नः । अत्र । वरिवः । कृणोतु । **46 (50)**

**TS 1.4.44.2**

त्वनु मार्ष्टु तनुवो यद्–विलिष्टं ॥
यदद्य त्वा प्रयति यज्ञे अस्मिन्नग्ने होतारमवृणीमहीह ।
ऋधगयाड्ऋधगुताशमिष्ठाः प्रजानन्. यज्ञमुप याहि विद्वान् ॥
स्वगा वो देवाः सदनमकर्म य आजग्म सवनेदं जुषाणाः ।
जक्षिवाꣳसः पपिवाꣳसश्च विश्वे ऽस्मे धत्त वसवो वसूनि ॥
याना ऽवह उशतो देव देवान् तान् – [ ] **47**

**TS 1.4.44.2 (Padam)**

अन्विति । मार्ष्टु । तनुवः । यत् । विलिष्टमिति वि – लिष्टम् ॥ यत् ।
अद्य । त्वा । प्रयतीति प्र – यति । यज्ञे । अस्मिन्न् । अग्ने ।

होतारम् । अवृणीमहि । इह ॥ ऋधक् । अयाट् । ऋधक् । उत ।
अशमिष्ठाः । प्रजानन्निति प्र – जानन्न् । यज्ञम् । उपेति । याहि ।
विद्वान् ॥ स्वर्गेति स्व – गा । वः । देवाः । सदनम् । अकर्म । ये ।
आजग्मेत्या – जग्म । सवना । इदम् । जुषाणाः ॥ जक्षिवाꣳसः ।
पपिवाꣳसः । च । विश्वे । अस्मे इति । धत्त । वसवः । वसूनि ॥
यान् । एति । अवहः । उशतः । देव । देवान् । तान् । **47 (50)**

**TS 1.4.44.3**

प्रेरय स्वे अग्ने सधस्थे ।
वहमाना भरमाणा हवीꣳषि वसुं घर्मं दिवमा तिष्ठतानु ॥
यज्ञ यज्ञं गच्छ यज्ञपतिं गच्छ स्वां ँयोनिं गच्छ स्वाहैष ते यज्ञो
यज्ञपते सहसूक्तवाकः सुवीरः स्वाहा देवा गातुविदो गातुं ँवित्त्वा
गातुमित मनसस्पत इमं नो देव देवेषु यज्ञꣳ स्वाहा वाचि स्वाहा
वाते धाः ॥ **48**

**TS 1.4.44.3 (Padam)**

प्रेति । ईरय । स्वे । अग्ने । सधस्थ इति सध – स्थे ॥ वहमानाः ।
भरमाणाः । हवीꣳषि । वसुम् । घर्मम् । दिवम् । एति । तिष्ठत ।

अनु ॥ यज्ञ । यज्ञम् । गच्छ । यज्ञपतिमिति यज्ञ - पतिम् । गच्छ । स्वाम् । योनिम् । गच्छ । स्वाहा । एषः । ते । यज्ञः । यज्ञपत इति यज्ञ - पते । सहसूक्तवाक इति सहसूक्त - वाकः । सुवीर इति सु - वीरः । स्वाहा । देवाः । गातुविद इति गातु - विदः । गातुम् । वित्त्वा । गातुम् । इत । मनसः । पते । इमम् । नः । देव । देवेषु । यज्ञम् । स्वाहा । वाचि । स्वाहा । वाते । धाः ॥ **48 (48)**

**(कृणोतु - तान - ष्टाचत्वारि॑ शच्च )** *(A44 )*

**TS 1.4.45.1**

उरु॑ हि राजा वरुणश्चकार सूर्याय पन्था-मन्वेतवा उ ।
अपदे पादा प्रतिधातवे ऽकरुतापवक्ता हृदयाविधश्चित् ॥
शतं ते राजन् भिषजः सहस्रमुर्वी गंभीरा सुमतिष्टे अस्तु ।
बाधस्व द्वेषो निर्.ऋतिं पराचैः कृतं चिदेनः प्र मुमुग्ध्यस्मत् ॥
अभिष्ठितो वरुणस्य पाशो ऽग्नेरनीकमप आ विवेश ।
अपां नपात् प्रतिरक्षन्नसुर्यं दमेदमे - [ ] **49**

**TS 1.4.45.1 (Padam)**

उरुम् । हि । राजा । वरुणः । चकार । सूर्याय । पन्थाम् । अन्वेतवा

इत्यनु – एतवै । उ ॥ अपदे । पादा । प्रतिधातव इति प्रति–धातवे ।

अकः । उत । अपवक्तेत्यप – वक्ता । हृदयाविध इति

हृदय – विधः । चित् ॥ शतम् । ते । राजन्न् । भिषजः । सहस्रम् ।

उर्वी । गंभीरा । सुमतिरिति सु – मतिः । ते । अस्तु ॥ बाधस्व ।

द्वेषः । निर्.ऋतिमिति निः – ऋतिम् । पराचैः । कृतम् । चित् ।

एनः । प्रेति । मुमुग्धि । अस्मत् ॥ अभिष्ठित इत्यभि – स्थितः ।

वरुणस्य । पाशः । अग्नेः । अनीकम् । अपः । एति । विवेश ॥

अपाम् । नपात् । प्रतिरक्षन्निति प्रति – रक्षन्न् । असुर्यम् ।

दमेदम इति दमे – दमे । **49 (50)**

**TS 1.4.45.2**

समिधं ँयक्ष्यग्ने ।

प्रति ते जिह्वा घृतमुच्चरण्येथ् समुद्रे ते हृदयमफ्स्वन्तः ।

सं त्वा विशन्त्वोषधी–रुता ऽऽपो यज्ञस्य त्वा यज्ञपते हविर्भिः ।

सूक्तवाके नमोवाके विधेमावभृथ निचङ्कुण निचेरुरसि
निचङ्कुणाव देवै–र्देवकृतमेनो ऽयाडव मर्त्यैर्मर्त्यकृतमुरोरा
नो देव रिषस्पाहि सुमित्रा न आप ओषधयः – [ ] **50**

**TS 1.4.45.2 (Padam)**

समिधमिति सं – इधम् । यक्षि । अग्ने ॥ प्रतीति । ते । जिह्वा ।
घृतम् । उदिति । चरण्येत् । समुद्रे । ते । हृदयम् ।
अप्स्वित्यप् – सु । अन्तः ॥ समिति । त्वा । विशन्तु । ओषधीः ।
उत । आपः । यज्ञस्य । त्वा । यज्ञपत इति यज्ञ – पते ।
हविर्भिरिति हविः – भिः ॥ सूक्तवाक इति सूक्त – वाके ।
नमोवाक इति नमः – वाके । विधेम । अवभृथेत्यव – भृथ ।
निचङ्कुणेति नि – चङ्कुण । निचेरुरिति नि – चेरुः । असि ।
निचङ्कुणेति नि – चङ्कुण । अवेति । देवैः । देवकृतमिति
देव – कृतम् । एनः । अयाट् । अवेति । मर्त्यैः । मर्त्यकृतमिति
मर्त्य – कृतम् । उरोः । एति । नः । देव । रिषः । पाहि ।
सुमित्रा इति सु – मित्राः । नः । आपः । ओषधयः । **50 (50)**

**TS 1.4.45.3**

सन्तु दुर्मित्रास्तस्मै भूयासु यो ऽस्मान् द्वेष्टि यं च वयं द्विष्मो

देवीराप एष वो गर्भस्तं ँवः सुप्रीतꣳ सुभृतमकर्म

देवेषु नः सुकृतो ब्रूतात्–प्रतियुतो वरुणस्य पाशः प्रत्यस्तो

वरुणस्य पाश एधो ऽस्येधिषीमहि समिदसि तेजो ऽसि तेजो मयि

धेह्यपो अन्वचारिषꣳ रसेन समसृक्ष्महि ।

पयस्वाꣳ अग्न आ ( ) ऽगमं तं मा सꣳ सृज वर्चसा ॥ **51**

**TS 1.4.45.3 (Padam)**

सन्तु । दुर्मित्रा इति दुः–मित्राः । तस्मै । भूयासुः । यः । अस्मान् ।

द्वेष्टि । यम् । च । वयम् । द्विष्मः । देवीः । आपः । एषः । वः ।

गर्भः । तम् । वः । सुप्रीतमिति सु – प्रीतम् ।

सुभृतमिति सु – भृतम् । अकर्म । देवेषु । नः । सुकृत इति

सु–कृतः । ब्रूतात् । प्रतियुत इति प्रति – युतः । वरुणस्य । पाशः ।

प्रत्यस्त इति प्रति – अस्तः । वरुणस्य । पाशः । एधः । असि ।

एधिषीमहि । समिदिति सम् – इत् । असि । तेजः । असि ।

तेजः । मयि । धेहि । अपः । अन्विति । अचारिषम् । रसेन ।

समिति । असृक्ष्महि । पयस्वान् । अग्ने । एति ( ) । अगमम् ।
तम् । मा । समिति । सृज । वर्चसा ॥ **51 (56)**

**(दमेदम – ओषधय – आ – षट्च)** *(A45)*

**TS 1.4.46.1**

यस्त्वा हृदा कीरिणा मन्यमानो ऽमर्त्यं मर्त्यो जोहवीमि ।
जातवेदो यशो अस्मासु धेहि प्रजाभिरग्ने अमृतत्वमश्यां ॥
यस्मै त्वꣳ सुकृते जातवेद उ लोकमग्ने कृणवः स्योनं ।
अश्विनꣳ स पुत्रिणं वीरवन्तं गोमन्तꣳ रयिं नशते स्वस्ति ॥
त्वे सु पुत्र शवसो ऽवृत्रन् कामकातयः । न त्वामिन्द्राति रिच्यते ॥
उक्थउक्थे सोम इन्द्रं ममाद नीथेनीथे मघवानꣳ – [ ] **52**

**TS 1.4.46.1 (Padam)**

यः । त्वा । हृदा । कीरिणा । मन्यमानः । अमर्त्यम् । मर्त्यः ।
जोहवीमि ॥ जातवेद इति जात – वेदः । यशः । अस्मासु । धेहि ।
प्रजाभिरिति प्र – जाभिः । अग्ने । अमृतत्वमित्यमृत – त्वम् ।
अश्याम् ॥ यस्मै । त्वम् । सुकृत इति सु – कृते । जातवेद इति
जात–वेदः । उ । लोकम् । अग्ने । कृणवः । स्योनम् ॥ अश्विनम् ।

सः । पुत्रिणम् । वीरवन्तमिति वीर – वन्तम् । गोमन्तमिति
गो – मन्तम् । रयिम् । नशते । स्वस्ति ॥ त्वे इति । स्विति । पुत्र ।
शवसः । अवृत्रन्न् । कामकातय इति काम – कातयः ॥ न । त्वाम् ।
इन्द्र । अतीति । रिच्यते ॥ उक्थउक्थ इत्युक्थे – उक्थे । सोमः ।
इन्द्रम् । ममाद । नीथेनीथ इति नीथे – नीथे ।
मघवानमिति मघ – वानम् । **52 (50)**

**TS 1.4.46.2**

सुतासः ।

यदीꣳ सबाधः पितरं न पुत्राः समानदक्षा अवसे हवन्ते ॥
अग्ने रसेन तेजसा जातवेदो वि रोचसे । रक्षोहा ऽमीवचातनः ॥
अपो अन्वचारिषꣳ रसेन समसृक्ष्महि ।
पयस्वाꣳ अग्न आ ऽगमं तं मा सꣳ सृज वर्चसा ॥
वसुर्वसुपतिर्. हिकमस्यग्ने विभावसुः । स्याम ते सुमतावपि ॥
त्वामग्ने वसुपतिँ वसूनामभि प्र मन्दे – [ ] **53**

**TS 1.4.46.2 (Padam)**

सुतासः ॥ यत् । ईम् । सबाध इति स – बाधः । पितरम् । न ।

पुत्राः । समानदक्षा इति समान–दक्षाः । अवसे । हवन्ते ॥ अग्ने ।

रसेन । तेजसा । जातवेद इति जात – वेदः । वीति । रोचसे ॥

रक्षोहेति रक्षः – हा । अमीवचातन इत्यमीव – चातनः ॥ अपः ।

अन्विति । अचारिषम् । रसेन । समिति । असृक्ष्महि ॥ पयस्वान् ।

अग्ने । एति । अगमम् । तम् । मा । समिति । सृज । वर्चसा ॥

वसुः । वसुपतिरिति वसु – पतिः । हिकम् । असि । अग्ने ।

विभावसुरिति विभा – वसुः ॥ स्याम । ते । सुमताविति सु–मतौ ।

अपि ॥ त्वाम् । अग्ने । वसुपतिमिति वसु – पतिम् । वसूनाम् ।

अभि । प्रेति । मन्दे । **53 (50)**

**TS 1.4.46.3**

अद्ध्वरेषु राजन्न् ।

त्वया वाजं ँवाजयन्तो जयेमाभि ष्याम पृथ्सुती मर्त्यानां ।

त्वामग्ने वाजसातमं ँविप्रा वर्द्धन्ति सुष्टुतं । स नो रास्व सुवीर्यं ॥

अयं नो अग्निर्वरिवः कृणोत्वयं मृधः पुर एतु प्रभिन्दन्न् ।

अय९ शत्रूञ्जयतु जर्.हृषाणो ऽयं ँवाजं जयतु वाजसातौ ॥

अग्निना ऽग्निः समिद्ध्यते कवि र्गृहपति र्युवा ।

हव्यवाड् जुह्वास्यः ॥

त्व७ ह्यग्ने ( ) अग्निना विप्रो विप्रेण सन्थ्सता ।

सखा सख्या समिद्ध्यसे ॥

उदग्ने शुचयस्तव वि ज्योतिषा ॥ 54

**TS 1.4.46.3 (Padam)**

अदध्वरेषु । राजन्न् ॥ त्वया । वाजम् । वाजयन्त इति वाज–यन्तः । जयेम । अभीति । स्याम । पृथ्सुतीः । मर्त्यानाम् ॥ त्वाम् । अग्ने । वाजसातममिति वाज – सातमम् । विप्राः । वर्द्धन्ति । सुष्टुतमिति सु – स्तुतम् ॥ सः । नः । रास्व । सुवीर्यमिति सु – वीर्यम् ॥ अयम् । नः । अग्निः । वरिवः । कृणोतु । अयम् । मृधः । पुरः । एतु । प्रभिन्दन्निति प्र – भिन्दन्न् ॥ अयम् । शत्रून् । जयतु । जर्.हृषाणः । अयम् । वाजम् । जयतु । वाजसाताविति वाज–सातौ ॥ अग्निना । अग्निः । समिति । इदध्यते । कविः ।

गृहपतिरिति गृह - पतिः । युवा ॥ हव्यवाडिति हव्य - वाट् ।
जुह्वास्य इति जुहु - आस्यः ॥ त्वम् । हि । अग्ने ( ) । अग्निना ।
विप्रः । विप्रेण । सन्न् । सता ॥ सखा । सख्या ।
समिदध्यस इति सम् - इदध्यसे ॥ उदिति । अग्ने । शुचयः ।
तव । वीति । ज्योतिषा ॥ **54 (64)**

**(मघवानं - मन्दे - ह्यग्ने - चतुर्दश च)** *(A46)*

==========================

**Prasna Korvai with starting Padams of 1 to 46 Anuvaakams : -**

आ द॒दे – वा॒चस्पतय – उपया॒मगृ॒हीतो॒ऽस्या– वायो – अ॒यं ँवां – ँयावां – प्रात॒र्युजा – व॒यं – तं – ँये देवा – स्त्रि॒ँ॒शा – दुपया॒मगृहीतोऽसि – मू॒र्द्धानं॑ – मधु॒श्चे – न्द्रा॒ग्नी – ओमासो – म॒रुत्व॒न्त – मिन्द्र – मरुत्वो – म॒रुत्वान् – म॒हान् – म॒हा॒न्नुवत् – क॒दा – वा॒म – मदब्धेभि॒र्. हिरण्यपाणिँ – सु॒शर्मा॒ – बृ॒हस्पति सुतस्य॒ – हरि॒रस्य – ग्न – उ॒त्तिष्ठन् – त॒रणि॒ – राप्यायस्वे॒ – युष्टे ये – ज्योतिष्मतीं – प्रया॒साय – चि॒त्त – माति॒ष्ठे – न्द्र॒ – मसा॒वि – सर्वस्य – म॒हान्थ् – स॒जोषा॒ – उदु॒त्यं – धा॒तो – रुँ हि – यस्त्वा॒ षट्चत्वारिँशत् ।

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis : -**

(आ द॒दे – ये देवा – म॒हा – नु॒त्तिष्ठ॒न्थ् – सर्वस्य – सन्तु दुर्मि॒त्रा – श्चतुष्पञ्चा॒शत् । )

**First and Last Padam of Fourth Prasnam : -**

(आ द॒दे – वि ज्योतिषा । )

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठे

प्रथमकाण्डे चतुर्थः प्रश्नः समाप्तः ॥

## Summary breakup of Padam - in Kaandam 1, Prasnam 4

| Particulars | | Example ( in Pada PaaTam) | No. of Padams as per Pada PaaTam |
|---|---|---|---|
| सामान्य पदानि | Ord | इषे । त्वा । ऊर्जे । | 1414 |
| उपसर्ग पदानि | PRE | एति = (आ+इति) । उपेति = (उप+इति) । प्रेति = (प्र+इति) । | 92 |
| वेष्टन पदानि | PS | उपायवः = उपायव इत्युप - आयवः । बाहुभ्याम् = बाहुभ्यामिति बाहु - भ्याम्) । | 285 |
| प्रग्रह पदानि | PG | ते = (ते इति) । त्वे = (त्वे इति) । चक्षुषी = (चक्षुषी इति) । विष्णो = विष्णो इति॒ । | 15 |
| प्रग्रह वेष्टन पदानि | PGS | अधिषवणे = अधिषवणे इत्यधि - सवने । इन्द्राग्नी = इन्द्राग्नी इतीन्द्र - अग्नी | 4 |
| | | **Total Padams** | **1810** |

## Details of Panchati and Padam for Kandam 1 , Prasanam 4 (TS 1.4)

| | Panchati | Padams |
|---|---|---|
| Anuvakam 1 | 2 | 109 |
| Anuvakam 2 | 1 | 47 |
| Anuvakam 3 | 1 | 57 |
| Anuvakam 4 | 1 | 43 |
| Anuvakam 5 | 1 | 20 |
| Anuvakam 6 | 1 | 18 |
| Anuvakam 7 | 1 | 19 |
| Anuvakam 8 | 1 | 25 |
| Anuvakam 9 | 1 | 26 |
| Anuvakam 10 | 1 | 43 |
| Anuvakam 11 | 1 | 42 |
| Anuvakam 12 | 1 | 22 |
| Anuvakam 13 | 1 | 35 |
| Anuvakam 14 | 1 | 30 |
| Anuvakam 15 | 1 | 20 |
| Anuvakam 16 | 1 | 20 |
| Anuvakam 17 | 1 | 26 |
| Anuvakam 18 | 1 | 29 |
| Anuvakam 19 | 1 | 29 |
| Anuvakam 20 | 1 | 19 |
| Anuvakam 21 | 1 | 26 |
| Anuvakam 22 | 1 | 77 |
| Anuvakam 23 | 1 | 24 |
| Anuvakam 24 | 1 | 23 |
| Anuvakam 25 | 1 | 14 |
| Anuvakam 26 | 1 | 12 |
| Anuvakam 27 | 1 | 15 |
| Anuvakam 28 | 1 | 26 |
| Anuvakam 29 | 1 | 23 |
| Anuvakam 30 | 1 | 21 |
| Anuvakam 31 | 1 | 20 |
| Anuvakam 32 | 1 | 9 |
| Anuvakam 33 | 1 | 19 |
| Anuvakam 34 | 1 | 36 |
| Anuvakam 35 | 1 | 24 |

| | | |
|---|---|---|
| Anuvakam 36 | 1 | 18 |
| Anuvakam 37 | 1 | 26 |
| Anuvakam 38 | 1 | 23 |
| Anuvakam 39 | 1 | 27 |
| Anuvakam 40 | 1 | 26 |
| Anuvakam 41 | 1 | 26 |
| Anuvakam 42 | 1 | 30 |
| Anuvakam 43 | 2 | 118 |
| Anuvakam 44 | 3 | 148 |
| Anuvakam 45 | 3 | 156 |
| Anuvakam 46 | 3 | 164 |
| Total → | 54 | 1810 |